संस्कृत-वार्ता:

31.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना अद्य उत्तरप्रदेशस्य मेरठ-जनपदे भाजपा-दलस्य लोकसभा-निर्वाचन-प्रचारस्य आरम्भः कृतः।

- दिल्ल्या: रामलीला प्रांगणे इण्डिया-इति विपक्षिदलसंघेन आरोपितम् यत् केन्द्र-प्रशासनेन विपक्षिदलानाम् पीडनाय संस्थानां दुरूपयोग: क्रियते।

- राष्ट्रपतिः द्रौपदी-मुर्मूः नव दिल्ल्यां पूर्व उपप्रधानमन्त्रिणं एल.के.आडवाणीवर्यं देशस्य सर्वोच्च-नागरिक-पुरस्कारेण भारतरत्नेन सम्मानितवती ।

- केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमणेन उक्तं यत् भारतस्य सकल-देशीय-उत्पाद-वृद्धिः प्रसक्त-वित्तवर्षस्य चतुर्थे त्रैमासिके, अष्ट-प्रतिशतादपि अधिका इति अनुमानितम् ।

- आईपीएल-क्रिकेट्-क्रीडायां- अहमदाबाद-नगरे सनराइजर्-हैदराबाद-दलेन गुजरात-टाइटन्स्-दलास्य विरुद्धं त्रिषष्ट्युत्तर-एकशतं धावानांकानां लक्ष्यं प्रदत्तम् । दिल्ली कैपिटल्स् तथा चेन्नै सुपर किङ्ग्स् इत्येतयोः मध्ये द्वितीया-क्रीडा सायं सार्धसप्त-वादने विशाखापत्तनम्-नगरे आरप्स्यते।

<u>मेरठ-जनसभा</u>

भाजपा-दलस्य वरिष्ठनेत्रा प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना अद्य उत्तरप्रदेशस्य मेरठ-जनपदे भाजपा-दलस्य लोकसभा-निर्वाचन-प्रचारस्य आरम्भः कृतः। जनसभां सम्बोधयन् श्रीमोदी अवदत् यत् ऐषमः लोकसभानिर्वाचनं केवलं सर्वकारस्य निर्माणार्थं न, अपितु भारतं विकसितराष्ट्रं विश्वस्य तृतीयं बृहत्तमं आर्थिकमहाशक्तिं च कर्तुं भवति। सः अवदत् यत्, यदा भारतं विश्वस्य एकादश-तमा बृहत्तमा अर्थव्यवस्था आसीत् तदा भारतस्य दारिद्र्यस्य मानम् उच्छ्रितम् आसीत् । प्रधानमन्त्रिणा उक्तं यत्, यदा भारतं पञ्चमा बृहत्तमा अर्थव्यवस्था अभवत् तदा पञ्चविंशति-कोटिभ्यः अपि अधिकाः जनाः सफलतया दारिद्र्यात् बहिः आगताः। सः अवदत्, यदा भारतं तृतीयं-बृहत्तम-अर्थव्यवस्था भविष्यति तदा दारिद्र्यस्य उन्मूलनं भविष्यति तथा च मध्यमवर्गः भारतस्य विकासाय ईंधनं प्रदास्यति। प्रधानमन्त्रिणा उक्तं यत्, भारतं विनिर्माणक्षेत्रे अपूर्वं निवेशं कुर्वन् अस्ति तथा च देशस्य युवानः प्रत्येकस्मिन् क्षेत्रे अनेकान्

अवसरान् प्राप्नुवन्ति। श्री-मोदी अवदत्, अद्य भारतस्य विश्वसनीयता सम्पूर्णे विश्वे उन्नतस्थाने अस्ति तथा च समग्रं विश्वं भारतं प्रति पश्यति। सः अवदत् यत्, विगतदशवर्षेषु अयोध्यायां राममन्दिरस्य निर्माणं, वन-रैंक-वन-पेंशन-योजना, त्रिपल-तलाक-इत्यस्य अभ्यासस्य विरुद्धं कठोर-विधिः, लोकसभायां विधानसभायां च महिलानां कृते त्रयस्त्रिंशत् प्रतिशतं आरक्षणं सदृशानि असाधारणकार्याणि कृतानि वर्तन्ते ।

विपक्षी दलेन-महाजनसभा

भारतीय-राष्ट्रिय-विकास समावेशि-संघटनम्-इण्डिया -इति विपक्षिदलसंघेन अद्य दिल्या: रामलीला प्रांगणे दिल्या: मुख्यमन्त्रिण: अरविन्द-केजरीवालस्य निगडनेन सहैव विविधान विषयान् उद्देश्य एका महाजनसभा आयोजिता। जनसभां सम्बोध्यता कांग्रेसदलस्य अध्यक्षेण मल्लिकार्जुन खड्गे इत्यनेन भणितं यत् केन्द्र-प्रशासनेन विपक्षिदलानाम् पीडनाय संस्थानां दुरूपयोग: क्रियते। स: उक्तवान् यत् इदं निर्वाचनम् लोकतंत्रस्य संविधानस्य च रक्षणार्थम् अस्ति।

भारतरत्नम्

राष्ट्रपतिः द्रौपदी-मुर्मूः पूर्व उपप्रधानमन्त्रिणं एल.के.आडवाणीवर्यं देशस्य सर्वोच्च-नागरिक-पुरस्कारेण भारतरत्नेन सम्मानितवती । राष्टर्पतिना अयं पुरस्कारः अद्य नवदिल्याः आडवाणी – महोदयस्य निवासस्थाने एव प्रदत्तः । अस्मिन् अवसरे उपराष्ट्रपतिः जगदीप-धनखडः प्रधानमन्त्री श्रीनरेन्द्र-मोदी, पूर्व-उपराष्ट्रपतिः एम. वेंकैया नायडू, रक्षामंत्री राजनाथ सिंहः, गृहमंत्री अमित-शाहः अथ आडवाणी-वर्यस्य परिवार-सदस्याः अपि उपस्थिताः आसन् । अन्तर्जालीय-सन्देशे राष्ट्रपतिना उक्तं यत् भारतीय-राजनीतेः शिखरव्यक्तित्वम्-लालकृष्ण-आडवाणी, सप्त-दशकाधिकं यावत् दृढसमर्पणेन असाधारणकौशलेन च देशस्य सेवां कृतवान् । सप्तविंशत्यधिक-नवदशशत-तमे वर्षे कराचीनगरे जन्म प्राप्य सप्त-चत्वारिंशदुत्तर-नवदशशत-तमे वर्षे देश-विभजनसमये श्री आडवाणी भारतम् आगतः । सः सांस्कृतिकराष्ट्रवादस्य लक्ष्यं स्थापयित्वा दशकानि यावत् परिश्रमं कृतवान्, येन देशस्य सामाजिक-राजनैतिक-परिदृश्ये परिवर्तनं जातम् । राष्ट्रपतिः अवदत् यत् यदा आपत्कालः देशस्य लोकतन्त्राय संकटम् अयच्छत् तदा श्री-आडवाणी अदम्यसाहसेन देशं निरङ्कुशबलात् उद्धर्तुं साहाय्यं कृतवान् । राष्ट्रपतिः अवदत् यत् श्री-आडवाणी स्वातन्त्र्यानन्तरं तेषु नेतृषु अन्यतमः अस्ति यः राष्ट्रिय-हितम् अग्रे स्थापयित्वा देशं विकासमार्गे नीतवान् । राष्ट्रपतिना उक्तं यत् आडवाणी-महोदयस्य उपलब्धयः देशस्य निहितप्रतिभायाः समावेशीय-परम्पराणां च उत्तमः अभिव्यक्तिः अस्ति।

निर्मला सीतारमण:-

केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमणेन उक्तं यत् भारतस्य सकल-देशीय-उत्पाद-वृद्धिः प्रसक्त-वित्तवर्षस्य चतुर्थे त्रैमासिके, अष्ट-प्रतिशतादपि अधिका इति अनुमानितम्। मुम्बईनगरे निवेश-सम्मेलनं सम्बोधयन्ती सा अवदत् यत् महार्घ-प्रबन्धनस्य, स्थूल-आर्थिक-स्थिरतायाः प्रभावात् त्रयोविंशति-चतुर्विंशति- वित्तीयवर्षस्य कृते अर्थव्यवस्थायाः वृद्धिः समानमित्या भविष्यति इति अपेक्षा अस्ति। वित्तमन्त्री उक्तवती यत् भारतं एशियाखण्डस्य तृतीया बृहत्तमा अर्थव्यवस्था अस्ति। अक्टोबर्-मासतः डिसेम्बर-मासपर्यन्तं अष्ट दशमलव चतुः-प्रतिशतं वृद्धिः अभवत्, यत् पूर्व-त्रैमासिके सप्त दशमलव षट् प्रतिशतं वृद्धिः अभवत्। सा अवदत् यत् तृतीय-त्रैमासिके अष्ट दशमलव चतुः प्रतिशतस्य वृद्धि-परिमाणम् अनुसरद्भिः विभिन्नाभिः आर्थिकसंस्थाभिः भारतस्य सकल-देशीय-उत्पाद-वृद्धि-परिमाणस्य अनुमानं वर्धितम्। अद्यतनतमम् अनुमानम् - वैश्विकवित्तीयसंस्थायाः गोल्डमैन् साक्सस्य अस्ति, यया संस्थया भारतीय अर्थव्यवस्थायाः कृते ऐषमः वित्तीयवर्षस्य आर्थिकवृद्धि-परिमाणस्य अनुमानं स्व-पूर्वानुमानात् दशबिन्दून् वर्धयित्वा षड् दशमलव षड् प्रतिशतं कृतम् अस्ति।

ईस्टर-उत्सवः

अद्य सम्पूर्णे विश्वे ईस्टर-उत्सवः महता उत्साहेन आचर्यते। प्रभुः येशुः शूले स्थापितः सन् अस्मिन् दिने तस्य पुनरुत्थानम् अभवत् इति विश्वासः अस्ति। राष्ट्रपतिः द्रौपदी मुर्मूः भारतस्य विदेशस्य च नागरिकेभ्यः विशेषतया ईसाई-समुदायस्य कृते ईस्टर-दिनस्य शुभकामनां दत्तवती। सा स्वसन्देशे अवदत् यत् एषः उत्सवः प्रेम-करुणायोः प्रतीकः अस्ति। उपराष्ट्रपतिः जगदीप धनखडः अपि जनेभ्यः ईस्टर-उत्सवस्य शुभकामनाम् अयच्छत्। स्वस्य अभिवादनसन्देशे सः अवदत् यत् ईस्टर-उत्सवः प्रेम-करुणा-क्षमानां पुनस्मारणं कारयति। प्रधानमन्त्री नरेन्द्रमोदी अपि देशवासिभ्यः ईस्टर-शुभकामनां दत्तवान्। अन्तर्जालीय-सन्देशे श्रीमोदी आशां प्रकटितवान् यत् एषः विशेषः अवसरः नवीकरणस्य आशावादस्य च सन्देशं प्रसारयिष्यति। सः अवदत् यत् एषः उत्सवःस्माकं सर्वेषाम् एकीकरणाय स्फूर्तिदायकः भवेत्।

केन्द्रीय-अन्वेषण-विभागः-

सीबीआई इति केन्द्रीय-अन्वेषण-विभागः श्वः अन्वेविभागस्य उत्थानदिवसस्य अवसरे विंशतितमस्य डी. पी. कोहली स्मृतिव्याख्यानस्य आयोजनं करिष्यति। भारतस्य मुख्य-न्यायाधीशः डी. वाई.चन्द्रचूडः श्वः नवीदिल्लीनगरस्य भारतमण्डपे डी.पी.कोहली स्मृतिव्याख्यानं प्रदास्यति। अस्मिन् वर्षे व्याख्यानस्य विषयः आपराधिकन्यायस्य उन्नयनार्थं प्रौद्योगिक्याः उपयोगः इति।

## जम्मू-कश्मीर-सैन्यकर्मिण:

जम्मू-कश्मीरे आरम्भमाणां पूजनीयाम् अमरनाथ-यात्राम् अभिलक्ष्य सर्वा: सज्जता: द्रुतगत्या प्रचाल्यते। अस्यां सज्जतायां आपदाम् प्रबन्धने, रक्षणोपाये च विशेष-बलं दीयते। आकाशवाण्या: जम्मूस्थस्य वार्ताहरेण प्रतिपादितं यत् केन्द्रशासित-प्रदेशस्य शैलारोहि-रक्षा-दलम् साम्बा जनपदस्य क्षेत्रेषु तीर्थटनम् सरलीकर्तुम् नियोजितम् अस्ति। अवधेयास्पदम् यत् अस्या: आराधनीययात्राया: शुभारम्भ: जून मासस्य अन्तिमदिवसात् भविष्यति इति अनुमीयते। इयं यात्रा द्विमासपर्यन्तं लक्षाधिक-श्रद्धालूनां आकर्षणस्य केन्द्रं भविष्यति। विभिन्नेषु क्षेत्रेषु दुर्घटना: रोद्धुम् सर्वाणि प्राधिकरणानि सावहितानि सन्ति। साम्प्रतं विविध-सुरक्षा-सेवाभ्य: कर्मिण: विशेष-प्रशिक्षण कार्यक्रमे प्रशिक्षणरता: सन्ति। एषु आरक्षिबलम् पुलिस इति, राष्ट्रिय-आपदा-मोचन-बलम्-एन.डी.आर.एफ. इति अर्द्धसैनिक बलानां च घटका: सन्निहिता: सन्ति।

## आईपीएल

आईपीएल-क्रिकेट्-क्रीडायां- अहमदाबाद-नगरे सनराइजर्-हैदराबाद-दलेन गुजरात-टाइटन्स्-दलास्य विरुद्धं त्रिषष्ट्युत्तर-एकशतं धावानांकानां लक्ष्यं प्रदत्तम् । दिल्ली कैपिटल्स् तथा चेन्नै सुपर किङ्ग्स् इत्येतयोः मध्ये द्वितीया-क्रीडा सायं सार्धसप्त-वादने विशाखापत्तनम्-नगरे आरप्स्यते।

।। इति वार्ता: ।।